19E

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – बहि:स्थ**

**परीक्षा : जानेवारी – २०२३**

**सत्र ६ वे**

**विषय: कादम्बरी (19E462)**

**दिनांक : ०३/०१/२०२३** **गुण :८०** **वेळ : दु. २.०० ते ५.००**

सूचना : सर्व प्रश्न अनिवार्य

**प्र.१. त्रयाणामनुवादं ससंदर्भं लिखत।** **(२४)**

१) देव, द्वारस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्चरस्थं शुकमादाय देवं विज्ञापयति 'सकलभुवनतलरत्नानामुदधिरिवैकभाजनं देवः। विहङ्मश्चायमाश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमादायागताहमिच्छामि देवदर्शनसुखमनुभवितुम्' इति। एतादाकर्ण्य 'देवः प्रमाणम्' इत्युक्त्वा विरराम। उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामालोक्य मुखानि 'को दोषः, प्रवेश्यताम्' इत्यादिदेश।

२) राजा तु तामार्यां श्रुत्वा संजातविस्मयः सहर्षमासन्नवर्तिनम्, अतिमहार्घहेमासनोपविष्टम्, अमरगुरुमिवाशेष–नीतिशास्त्रपारगम, अतिवयसम्, अग्रजन्मानम्, अखिलमन्त्रिमण्डलप्रधानमात्यं कुमारपलितनामानमब्रवीत श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वरे च मधुरता! प्रथम तावदिदमेव महदाश्चर्यं यदयमसंकीर्णवर्णप्रविभागाभिव्यक्तमात्रानुस्वारसंस्कारयोगां विशेषसंयुक्तां गिरमुदीरयति। तत्र पुनरपरमभिमत–विषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृतिः।

३) आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भतां, प्रतापानुरागावनतसमस्तसामन्तचक्रः चक्रवर्तिलक्षणोपेतः, चक्रधण इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, कमलयोनिरिव विमानीकृतराजहंसमण्डलः, जलधिरिव लक्ष्मीप्रसूतिः आश्रयो रसिकानाम् राजा शूद्रको नाम।

४) नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनारसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलमुवनतलो विक्रमत्रयायासितभुवनत्रयं च जहासेव च वासुदेवम्, अतिचिरकाललग्नमतिक्रान्तकृनृपति–सहस्रसम्पर्ककलङ्कमिवक्षालयन्ती यस्य विमले कृपाणजलधाराजले चिरमुवास राजलक्ष्मीः। यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुरगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति भगवतो नारायणस्य।

**प्र.२. ससंदर्भं स्पष्टीकरणं कुरुत। (केवलं षट्)** **(३६)**

१) नृसिंहस्य नखाङ्कुरा इव।

२) विधातुरस्थाने सौन्दर्यनिष्पादनप्रयत्नः।

३) भयपलायिता कालिन्दी।

४) कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी।

५) सकलरत्नामुदधिरिव देवो भाजनम्।

६) चन्दनलतेव भीषणरमणीया।

७) हरन्ति सन्तो मणिनुपुरा इव।

८) तदयमात्मीयः क्रियताम्।

**प्र.३. टिप्पणीद्वयं लिखत।** **(२०)**

१) वैशम्पायनः नाम शुक्रः

२) बाणकृतपूर्वजवर्णनम् नमनश्लोकश्च।

३) राज्ञः आस्थानमण्डपम्।

४) बाणस्य वर्णनचातुर्यम्।

---------